# Shri Mahaganapati Vajrapa njara Kavacham

# શ્રીમહાગણપતિવજ્રપઞ્જરકવચમ્

## Document Information

Text title : mahAgaNapativajrapanjarakavacham

File name : mahAgaNapativajrapanjarakavacham.itx

Category : ganesha, panjara, kavacha

Location : doc_ganesha

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Latest update : June 16, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

Shri Mahaganapati Vajrapa njara Kavacham

# શ્રીમહાગણપતિવજ્રપઞ્જરકવચમ્

॥ પૂર્વપીઠિકા ॥

મહાદેવિ ગણેશસ્ય વરદસ્ય મહાત્મનઃ ।
કવચં તે પ્રવક્ષ્યામિ વજ્રપઞ્જરકાભિધમ્ ॥

॥ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીમહાગણપતિવજ્રપઞ્જરકવચસ્ય શ્રીભૈરવ ઋષિઃ,
ગાયત્રં છન્દઃ, શ્રીમહાગણપતિ દેવતા, ગં બીજં, હ્રીં શક્તિઃ,
કુરુ કુરુ કીલકં, વજ્રવિદ્યાદિસિદ્ધ્યર્થે
મહાગણપતિવજ્રપઞ્જરકવચપાઠે વિનિયોગઃ ॥

॥ ઋષ્યાદિન્યાસઃ ॥

શ્રીભૈરવર્ષયે નમઃ શિરસિ । ગાયત્રછન્દસે નમો મુખે ।
શ્રીમહાગણપતિદેવતાયૈ નમો હૃદિ । ગં બીજાય નમો ગુહ્યે ।
હ્રીંશક્તયે નમો નાભૌ । કુરુ કુરુ કીલકાય નમઃ પાદયોઃ ।
વજ્રવિદ્યાદિસિદ્ધ્યર્થે મહાગણપતિવજ્રપઞ્જરકવચપાઠે
વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

॥ કરન્યાસઃ ॥

ગાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ગીં તર્જનીભ્યાં નમઃ ।
ગૂં મધ્યમાભ્યાં નમઃ । ગૈં અનામિકાભ્યાં નમઃ ।
ગૌં કનિષ્ઠિકાભ્યાં નમઃ । ગઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ અઙ્ગન્યાસઃ ॥

ગાં હૃદયાય નમઃ । ગીં શિરસે સ્વાહા । ગૂં શિખાયૈ વષટ્ ।
ગૈં કવચાય હુમ્ । ગૌં નેત્રત્રયાય વૌષટ્ । ગઃ અસ્ત્રાય ફટ્ ॥

॥ ધ્યાનમ્ ॥

વિઘ્નેશં વિશ્વવન્દ્યં સુવિપુલયશસં લોકરક્ષાપ્રદક્ષં
સાક્ષાત્સર્વાપદાસુ પ્રશમનસુમતિં પાર્વતીપ્રાણસૂનુમ્ ।
પ્રાયઃ સર્વાસુરેન્દ્રૈઃ સસુરમુનિગણૈઃ સાધકૈઃ પૂજ્યમાનં
કારુણ્યેનાન્તરાયામિતભયશમનં વિઘ્નરાજં નમામિ ॥

॥ કવચપાઠઃ ॥

ૐ શ્રીં હ્રીં ગં શિરઃ પાતુ મહાગણપતિઃ પ્રભુઃ ।
વિનાયકો લલાટં મે વિઘ્નરાજો ભ્રુવૌ મમ ॥ ૧॥

પાતુ નેત્રે ગણાધ્યક્ષો નાસિકાં મે ગજાનનઃ ।
શ્રુતી મેઽવતુ હેરમ્બો ગણ્ડૌ મે મોદકાશનઃ ॥ ૨॥

દ્વૈમાતુરો મુખં પાતુ ચાધરૌ પાત્વરિન્દમઃ ।
દન્તાન્મમૈકદન્તોઽવ્યાદ્વક્રતુણ્ડોઽવતાદ્રસામ્ ॥ ૩॥

ગાઙ્ગેયો મે ગલં પાતુ સ્કન્ધૌ સિંહાસનોઽવતુ ।
વિઘ્નાન્તકો ભુજૌ પાતુ હસ્તૌ મૂષકવાહનઃ ॥ ૪॥

ઊરૂ મમાવતાન્નિત્યં દેવસ્ત્રિપુરઘાતનઃ ।
હૃદયં મે કુમારોઽવ્યાજ્જયન્તઃ પાર્શ્વયુગ્મકમ્ ॥ ૫॥

પ્રદ્યુમ્નો મેઽવતાત્પૃષ્ઠં નાભિં શઙ્કરનન્દનઃ ।
કટિં નન્દિગણઃ પાતુ શિશ્નં વિશ્વેશ્વરોઽવતુ ॥ ૬॥

મેઢ્રે મેઽવતુ સૌભાગ્યો ભૃઙ્ગિરીટી ચ ગુહ્યકમ્ ।
વિરાટકોઽવતાદૂરૂ જાનૂ મે પુષ્પદન્તકઃ ॥ ૭॥

જઙ્ઘે મમ વિકર્તોઽવ્યાદ્ગુલ્ફાવન્ત્યગણોઽવતુ ।
પાદૌ ચિત્તગણઃ પાતુ પાદાધો લોહિતોઽવતુ ॥ ૮॥

પાદપૃષ્ઠં સુન્દરોઽવ્યાન્નૂપુરાઢ્યો વપુર્મમ ।
વિચારો જઠરં પાતુ ભૂતાનિ ચોગ્રરૂપકઃ ॥ ૯॥

શિરસઃ પાદપર્યન્તં વપુઃ સપ્તગણોઽવતુ ।
પાદાદિમૂર્ધપર્યન્તં વપુઃ પાતુ વિનર્તકઃ ॥ ૧૦॥

વિસ્મારિતં તુ યત્સ્થાનં ગણેશસ્તત્સદાઽવતુ ।
પૂર્વે માં હ્રીં કરાલોઽવ્યાદાગ્નેયે વિકરાલકઃ ॥ ૧૧॥

દક્ષિણે પાતુ સંહારો નૈરૃતે રુરુભૈરવઃ ।

પશ્ચિમે માં મહાકાલો વાયૌ કાલાગ્નિભૈરવઃ ॥ ૧૨॥

ઉત્તરે માં સિતાસ્યોઽવ્યાદૈશાન્યામસિતાત્મકઃ ।
પ્રભાતે શતપત્રોઽવ્યાત્સહસ્રારસ્તુ મધ્યમે ॥ ૧૩॥

દન્તમાલા દિનાન્તેઽવ્યાન્નિશિ પાત્રં સદાઽવતુ ।
કલશો માં નિશીથેઽવ્યાન્નિશાન્તે પરશુસ્તથા ।
સર્વત્ર સર્વદા પાતુ શઙ્ખયુગ્મં ચ મદ્વપુઃ ॥ ૧૪॥

ૐ ૐ રાજકુલે હૌં હૌં રણભયે હ્રીં હ્રીં કુદ્યૂતેઽવતાત્
શ્રીં શ્રીં શત્રુગૃહે શૌં શૌં જલભયે ક્લીં ક્લીં વનાન્તેઽવતુ ।
ગ્લૌં ગ્લૂં ગ્લૈં ગ્લં ગું સત્ત્વભીતિષુ મહાવ્યાધ્યાર્તિષુ ગ્લૌં ગં ગૌં
નિત્યં યક્ષપિશાચભૂતફણિષુ ગ્લૌં ગં ગણેશોઽવતુ ॥ ૧૫॥

॥ ફલશ્રુતિઃ ॥

ઇતીદં કવચં ગુહ્યં સર્વતન્ત્રેષુ ગોપિતમ્ ।
વજ્રપઞ્જરનામાનં ગણેશસ્ય મહાત્મનઃ ॥ ૧॥

અઙ્ગભૂતં મનુમયં સર્વાચારૈકસાધનમ્ ।
વિનાનેન ન સિદ્ધિઃ સ્યાત્પૂજનસ્ય જપસ્ય ચ ॥ ૨॥

તસ્માત્તુ કવચં પુણ્યં પઠેદ્વા ધારયેત્સદા ।
તસ્ય સિદ્ધિર્મહાદેવિ કરસ્થા પારલૌકિકી ॥ ૩॥

યં યં કામયતે કામં તં તં પ્રાપ્નોતિ પાઠતઃ ।
અર્ધરાત્રે પઠેન્નિત્યં સર્વાભીષ્ટફલં લભેત્ ॥ ૪॥

ઇતિ ગુહ્યં સુકવચં મહાગણપતેઃ પ્રિયમ્ ।
સર્વસિદ્ધિમયં દિવ્યં ગોપયેત્પરમેશ્વરિ ॥

॥ શ્રીરુદ્રયામલે તન્ત્રે શ્રીમહાગણપતિવજ્રપઞ્જરકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by anonymous456an at gmail.com

*Shri Mahaganapati Vajrapa njara Kavacham*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*